कस्य हेतोः ? स्वामिनं प्रति तस्याः सुखरूपसमुद्भवात् ।
सैव स्त्री सपत्नीर्दुःखाकरोति तत्कस्य हेतोः ? ताः प्रति
तस्या दुःखरूपसमुद्भवात् । एवं पुरुषान्तरं तामविन्दत्
सैव मोहयति तत्कस्य हेतोः ? तत्प्रति तस्या मोहरूप-
समुद्भवात् । अनया च स्त्रिया सर्वे भावा व्याख्याताः ।
तत्र यत्सुखहेतुस्तत्सुखात्मकं सत्त्वं, यत् दुःखहेतुस्तद्-
दुःखात्मकं रजः, यन्मोहहेतुस्तन्मोहात्मकं तमः, सुखप्र-
काशलाघवानां त्वेकस्मिन् युगपदुद्भूतावविरोधः सहद-
र्शनात् । तस्मात् सुखदुःखमोहैरिव विरोधिभिरेकैकगुण-
वृत्तिभिः सुखप्रकाशलाघवैर्न निमित्तभेदा उन्नीयन्ते एवं
दुःखोपष्टम्भकत्वप्रवर्त्तकत्वैरेवं मोहगुरुत्वावरणैरिति सिद्धं
त्रैगुण्यमिति" । सां० सूत्रे प्र० भाष्ये चोक्तम् ।

"सुखदुःखमोहधर्मिणी बुद्धिः सुखदुःखमोहधर्म्मात्मकद्रव्य-
जन्या कार्यत्वे सति सुखदुःखमोहात्मकत्वात् कान्ता-
दिवदिति कारणगुणानुसारेणैव कार्य्यगुणौचित्यं चात्रानु-
कूलस्तर्कः श्रुतिस्मृतयोऽपीति मन्तव्यम् । ननु विषयेषु
सुखादिमत्त्वे प्रमाणं नास्ति । अहं सुखीत्याद्येवानुभवात्
तत् कथं कान्तादिविषयो दृष्टान्त इति चेन्न सुखा-
द्यात्मकबुद्धिकार्य्यतया स्रक्सुखं चन्दनसुखमित्याद्यनुभवेन
च विषयाणामपि सुखादिधर्मकत्वसिद्धेः श्रुतिस्मृतिप्रामा-
ण्याच्च । किञ्च यस्यान्वयव्यतिरेकौ सुखादिना सह दृश्येते
तस्यैव सुखाद्युपादानत्वमपरिकल्प्यान्यस्योपादानत्वकल्पने
कारणद्वयकल्पनागौरवम् । अपि चान्योऽन्यसंवादेन प्रत्य-
भिज्ञया च विषयेषु सर्वपुरुषसाधारणस्थिरसुखसिद्धिः ।
तत्सुखग्रहणायास्मन्मते वृत्तिनियमादिकल्पनागौरवं च
फलमुखत्वान्न दोषावहम् । अन्यथा प्रत्यभिज्ञयावयव्य-
सिद्धिप्रसङ्गात् तत्कारणादिकल्पनागौरवादिति । विषयेऽपि
सुखादिकं च मार्कण्डेये प्रोक्तम् ।"तत् सन्ति चेतस्यथवापि
देहे सुखानि दुःखानि च किं ममात्र" इति । अहं
सुखीत्यादिप्रत्ययस्तु अहं धनीत्यादीप्रत्ययवत् स्वस्वामिभावा-
ख्यसम्बन्धविषयकस्तेषां प्रत्ययानां समवायसम्बन्धविषयकत्वभ्र-
मनिरासार्थं तु सुखिदुःखिमूढेभ्यः पुरुषो विविच्यते शास्त्रे-
ष्विति । शब्दादिषु च सुखाद्यात्मताव्यवहार एकार्थसमवा-
यात् । अस्तु वा शब्दादिषु साक्षादेव सुखसत्त्वप्रमाणेभ्यः ।
विषयगतसुखादेश्च बुद्धिमात्रग्राह्यत्वं फलबलात् । यत् तु
विषयासम्प्रयोगकाले शान्तिसुखं सात्त्विकं सुषुप्त्यादौ
व्यज्यते तदेव बुद्धिधर्म्म आत्मसुखमुच्यत इति" ।

वैशेषिकादयस्तु सुखादिकमात्मनएवधर्म्मः "बुद्ध्यादिषट्कं
संख्यादिपञ्चकं भावना तथा । धर्म्माधर्म्मौ गुणाएते आ-
त्मनः स्युश्चतुर्द्दश" इति भाषा० उक्तेः । मनसोऽणुत्वाङ्गी-
कारेण तेषां तद्गुणत्वे ज्ञानसुखादीनामप्रत्यक्षत्वापत्तेः ।
प्रत्यक्षे चाश्रयमहत्त्वस्य हेतुत्वात् मनसश्च ज्ञानायौगपद्ये-
नाणुत्वेन महत्त्वाभावादिति युक्तिं प्रदर्श्य श्रुतौ मनो-
धर्म्मत्ववचनन्तु आयुर्घृतमित्यादिवदौपचारिकमित्यङ्गी-
चक्रुः । तदेतन्मतमसमीचीनम् एकदा ह्रदावगाहे सकल-
देहव्यापिशैत्योपलब्धेः नृत्यगीताभिनयादेरेकदा श्रवण-
दर्शनादेर्दर्शनात् मनसोऽणुत्वासिद्धेः श्रौतमनोधर्म्मत्वस्य
निमित्तपरत्वकल्पनेऽपि "अन्नमशितं त्रेधा विधीयते
तस्य यःस्थविष्ठोधातुस्तत्पुरीषं यन्मध्यमं तन्मांसं यो-
ऽणिष्ठस्तन्मन" इति छा० उ० श्रुत्या "अन्नमयं हि सौम्य ! ।
मन" इत्युक्तस्य मनसोऽन्नविकारत्वस्य समर्थनाय प्रवृत्तया
बोधितस्य मनसोऽन्नजन्यत्वस्य अन्नभोजनोपचयापचयाभ्यां
तद्वृद्धिह्रासावगतेर्नाणुमानता मनस इति आगमविरोधे
अनुमानाप्रवृत्तेः अङ्गीकृतञ्च तैरपि शङ्खदृष्टान्तेन प्राण्य-
ङ्गत्वहेतुना नरकपालशुचित्वानुमाने "नारं स्पृष्ट्वास्थि
सस्नेहं सचेलं जलमाविशेत्" मनुस्मृत्या बाधादप्रामाण्य-
मतः प्रकृतेऽपि तथेति । मनसोऽनणुत्वाभिप्रायेणैव
"क्रमशोऽक्रमशश्च वृत्तयः" सां० सूत्रे मनसोऽनणुत्व-
निरासेन युगपद्वृत्तयोऽङ्गीकृताः । तथा सांख्य
कारिकाकौमुद्योरुक्तम् । "युगपच्चतुष्टयस्य तु वृत्तिः
क्रमशश्च तस्य निर्दिष्टा । दृष्टे तथाप्यदृष्टे त्रयस्य तत्-
पूर्विका वृत्तिः" का० "दृष्टे यथा यदा सन्तमसान्धकारे
विद्युत्सम्पातमात्रादभिमुखमतिसन्निहितं पश्यति
तदा खल्वस्यालोचनसङ्कल्पाभिमानाध्यवसाया युगपदेव
प्रादुर्भवन्ति, यतस्तत उत्पत्य तत्स्थानादेकपदेऽप-
सरति । क्रमशश्च यदा मन्दालोके प्रथमं तावद्वस्तु-
मात्रं सम्मुग्धमालोचयति अथ प्रणिहितमनाः कर्णा-
न्ताकृष्टशरः कुञ्चितपादः शिञ्जितज्यामण्डलीकृतको-
दण्डः प्रचण्डतरः पाटच्चरोऽयमिति निश्चिनोति अथ च
मां प्रत्येतीत्यभिमन्यते अध्यवस्यति अपसरामीतः स्थाना-
दिति । परोक्षे तु अन्तःकरणत्रयस्य बाह्येन्द्रियवर्ज्जं
वृत्तिरित्याह अदृष्टे त्रयस्य तत्पूर्विका वृत्तिः । अन्तः-
करणत्रयस्य युगपत् क्रमेण च वृत्तिर्दृष्टपूर्विकेति । अनु-
मानागमस्मृतयोहि परोक्षेऽर्थे दर्शनपूर्वाः प्रवर्त्तन्ते
नान्यथा । यथा दृष्टे तथा, अदृष्टेऽपीति योजना" कौ०
आकरेऽस्य प्रपञ्चः । तच्च सुखं त्रिविधम्" । यथा